CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.18.
Coll. No. 457

Title Kāśikavṛtti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 457. Subject: Grammar

Title: Kāsikā vritti

Author: Vāmana Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.2" by 4.2" Extent: 640-652 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Incomplete.

काशि॰पा॰७
६४०

॥श्रीगणेशाय नमः॥ ॥देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्॥ देविकाशिंशपादित्य
वाड्दीर्घसत्रश्रेयस इत्येतेषामंगानामचामादेरचः स्थाने वृद्धिसंयोगे आकार आदेशो भवति। तद्धि
ते ञिति णिति किति च परतः। देविकायां भवमुदकं दाविकं। दाविकायाम नगरामि णामि स्फत्र रपदवृद्धि
साप्याकार एव भवति। शांशपा। शिंशपाया विकारस्य मशः शांशपश्चमसः। पलाशादिभ्यो वेत्यतेन पक्षेण
अनुदात्तादिलक्षणो वा अञ्। शिंशपास्थलेभवाः। शिंशपास्थलादेवाः दीर्घसत्र। श्रेयस। श्रेयसि
भवं श्रायसं। वहीनरस्येद्वचनेन वृद्धिविषये आचामादेरचः स्थाने वहीनरस्य इकार आदेशो भवति
वहीनरस्यापत्यं वैहीनरिः। केचित्तु विहीनरस्येवं वैहीनरिमिच्छंति। केकयमित्रयुप्रलयानां यादे
रियः। केकयमित्रयुप्रलय इत्येतेषामंगानां यकारादेः इय इत्ययमादेशो भवति। तद्धिते ञिति णिति
कि च परतः। केकयस्यापत्यं कैकेयः जनपदशब्दात्क्षत्रियादञ्जित्यञ्। मित्रयुः। मित्रयुभावेन
श्लाघते मैत्रेयिकया श्लाघते। गोत्रचरणात् श्लाघात्याकारतदवेतेष्विति वुञ्। अकिं हितत्र गो
त्र

गृह्यते। तेकेवञ् ऋषिशब्दो गोत्रमित्यभिधीयते। प्रलयस्यप्रयादागतं प्रालेयमुदकं॥ ॥न य्वा
भ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्॥ ३ ॥यकारवकाराभ्यां पदांताभ्यामुत्तरस्याचामादेरचः स्थाने वृद्धि
र्न भवति। तद्धिते ञिति णिति किति च परतः। ताभ्यां तु यकारवकाराभ्यां पूर्वौ विचागमौ भवतः। यकारा
वैकारः। वकारादौकारः। व्यसने भवं वैयसनं। व्याकरणमधीते वैयाकरणः। स्वस्यापत्यं सौवश्वः। स्वा
त्वामिकि। अर्थस्यापत्यं आर्थिरिति। पदांताभ्यामिति किं। यष्टिः प्रहरणमस्य याष्टिकः। नकारात्र
यतः प्रतिषेधकत्वमैचोविषयत्वकर्षणात्युर्यद्भ्यामातंता। दाध्यश्वि। माध्वश्वि। नयव्ययः। ... कुत्तरस्या
चोवृद्धेः प्रसंगो नास्ति। उत्तरपदस्य अधोरप्ययं प्रतिषेध इष्यते। स्वर्वत्रनिर्देनरः स्वर्वनैयतिरः यत्र तु उत्तरप
दस्तं वृद्धीयण्न भवति। तत्र नेष्यते न प्रतिषेधः। वैश्वातिर्भवतोन्नतोन्नाविद्यामिति कः॥ ॥द्वारा
दीनां च॥ ४ ॥द्वार इत्येवमादीनां च य्वाभ्यामुत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति। स्वौ तु ताभ्यामैजा
गमो भवतः। ञिति णिति किति च तद्धितेषु परतः। द्वारद्वारे नियुक्तः दौवारिकः। द्वारपालस्यापत्यं दौवारपालिः॥

व का॰ अ॰ पा॰ ३
६४

स्वर । स्वरमधिकृत्य कृतो ग्रंथः । सौवरः अध्यायः । सौवर्यः समस्यः । स्वाध्याये भवः सौवाध्यायः । यत्र
कशः । व्यल्कशे भवः वैयल्कशः । स्वस्तिस्वस्तीत्याह सौवस्तिकः । स्वर् । स्वर्भवः सौवः । अश्वपानां नमात्रेति
लोपः । सायंप्रातिकाद्यर्थं । स्वर्गगमनमाह । सौवर्गगमनिकः । स्वाध्याय इति केचित् । पदांते । नदनर्थ
कमेव । पदिशोऽन्नो ध्यायः । तदादिविधिश्चांतर्भवति । स्वाध्याय इति गणस्यांतःपातो भवे एव सि
द्धं । अथाप्येवं । अध्यायः स्वाध्यायः । इत्येवमपि यत्नचात्र वत्रैव वस्तु शब्दस्य पाठगण सिद्धं । तदादाव
पि विधिरयं भवति । स्वकृत । स्वकृतस्यापत्यं स्याः स्वैकृतः । स्वादुमृदुन इदं सौवादुमृदवं ।
श्वन्शुनकश्व । शौवनं । अन्ते तिमन्न तिन्नावः । शुनो विकारः शौवं मांसं जागलि शौवादिर्योनि
पत्र । स्वदंष्ट्रायां भवः शौवादंष्ट्रं मणिः । स्वस्येदं सौवं । स्वग्रामे भवः सौवग्रामिकः । अध्यात्मा
दित्वाट्ठञ् । अपदांतार्थोऽयमारंभः । द्वारं स्वर स्वाध्याय व्यल्कश । स्वस्ति । स्वर् । स्वकृत । स्वादुमृ
दुमत् । श्वन् । श्व । न्यग्रोधस्य च केवलस्य ॥ ५ ॥ न्यग्रोधशब्दस्य केवलस्य यकारादुत्तरस्याकारस्यामा २

देरंगस्यावस्थाने वृद्धिर्न भवति । तद्धिते ञिति णिति किति च परतः । तस्मात्पूर्वमैकार आगमो
भवति । न्यग्रोधस्य विकारः नैयग्रोधश्चमसः । केवलस्येति किं । न्यग्रोधमूले भवाः शालयः न्यग्रोध
मूलाः । शालयः न्यग्रोहतीति न्यग्रोधः । इति । व्युत्पत्तिपक्षे नियमार्थमव्युत्पत्तिपक्षे तु विध्यर्थं ।
॥ ॥ न कर्मव्यतिहारे ॥ ६ ॥ कर्मव्यतिहारे यदुक्तं तन्न भवति । व्यावक्रोशी । व्यावलेखी । व्या
वचर्ची । व्यावहासी वर्तते । कर्मव्यतिहारेण कृतत्वाद्ब्रूयामनिष्पन्नं ॥ ॥ स्वागतादीनां च ॥ ७ ॥
स्वागत इत्येवमादीनां च यदुक्तं तन्न भवति । तद्धिते ञिति णिति किति च परतः । स्वागतमित्याह स्वाग
तिकः । स्वध्वर । स्वध्वरेण चरति स्वाध्वरिकः । व्यावहारिकः । स्वंग । स्वंगस्यापत्यं । व्यवहारस्य । छायांतो विकल्पितं ।
न तु कर्मव्यतिहारे इत्यत्र पर्युदासे । स्वपति । स्वपतौ साधुः स्वापतेयं । पथ्यतिथिवसतिस्वपतेर्ढञ्
द्वारादिषु स्वशब्दस्य पाठात्त्वे प्राप्तिः । स्वागत । स्वध्वर । स्वंग । व्यंग । व्यवहार । स्वपति । स्वादेरिनि ८
स्वादेरंगस्य । इनि परतो यदुक्तं तन्न भवति । स्वमस्यास्तीति स्वापतेयं स्वाध्याय । स्वादिः । स्वस्य राह्ना द्वारा

दिश्व पद्यते। तत्र च तदादिविधिर्भवति। तेन देववचनं ज्ञापकं। शुनः इकारादि ग्रहणं कर्तव्यं। श्वागणि
काघर्यं श्वगणेन चरति श्वागणिकः। श्वायूथिकः। तदंतस्य चान्यत्रापि तद्धित प्रतिषेध इष्यते। श्वा
नस्त्रेरिदं श्वानस्त्रं॥ ॥पदांतस्यान्यतरस्यां॥ ९ ॥श्वादेरंगस्य पदशब्दांतस्यान्यतरस्यां
यदुक्तं तन्न भवति। तद्धिते ञिति णिति किति च परतः। श्वापदस्येदं श्वापदं। शौवापदं॥ ॥
उत्तरपदस्य॥ १० ॥उत्तरपदस्येत्ययमधिकारः। हनस्तोचिण्णलोरिति प्रागेतस्माद्यदित ऊर्ध्व
मनुक्रमिष्यामः। उत्तरपदस्यैव तद्वेदितव्यं। वक्ष्यति॥ अवयवादृतोः। पूर्ववार्षिकं। अपरवार्षिकं।
पूर्वहैमनं। अपरहैमनं। यत्रापंचमी निर्देशो नास्ति जे प्रोष्ठपदानामित्येवमादौ तदर्थमुत्तर
पदाधिकारः। पंचमी निर्देशेष्वपि विस्पष्टार्थं। द्वंद्वेश्च व्यपदेशार्थं। उत्तरपदद्वंद्वे सर्वं वित्यत्र उत्तर
पदाधिकारस्यावधिरित्येवं विज्ञायते॥ ॥अवयवादृतोः॥ ११ ॥अवयववाचिनः शब्दात्परस्य ३
ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति। तद्धिते ञिति णिति किति परे। पूर्ववार्षिकं।

पूर्वहैमनं। अपरहैमनं। पूर्वं वर्षाणामपरं वर्षाणामित्येकदेशिसमासः। तत्र तत्र भव इत्येतस्मिन्नर्थे
वर्षाभ्यष्ठक्। हेमंताच्च। सर्वत्राण्च तलोपश्चेत्यण्प्रत्ययः। तत्र सतो वृद्धिमविधाय च पश्चान्नामि
नित्तदंतविधिः। अवयवादिति किं। पूर्वासु वर्षासु भवं पौर्ववार्षिकं। कालाच्चेति वञ्। अवयव
पूर्वस्यैतदंतविधिर्नान्यस्य॥ ॥सुसर्वार्धाज्जनपदस्य॥ १२ ॥सुसर्व अर्ध इत्येतेभ्य उत्तरस्य जनपद
वाचिनः शब्दस्याचामादेरचः स्थाने वृद्धिर्भवति। तद्धिते ञिति णिति किति च परतः। सुपांचाल
कः। सर्वपांचालकः। अर्धपांचालकः। जनपदतदवध्योश्च। अवृद्धादपि बहुवचनविषयादिति वुञ्।
सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदंतविधिः॥ ॥दिशोमद्राणां॥ १३ ॥दिग्वाचिनः उत्तरस्य
जनपदवाचिनः शब्दस्य मद्रशब्दवर्जितस्याचामादेरचो वृद्धिर्भवति। तद्धिते ञिति णिति किति च परतः
पूर्वपांचालकः। अपरपांचालकः। अमद्राणामिति किं। पौर्वमद्रः। आपरमद्रः। मद्रेभ्योञित्यञ्
प्रत्ययः। योगविभाग उत्तरार्थः॥ ॥प्राचां ग्रामनगराणां॥ १४ ॥प्राचां देशे ग्रामनगराणां दिश

उत्तरेषामचामादेरचः स्थाने वृद्धिर्भवति। तद्धिते ञिति णिति किति च परतः। ग्रामाणां तावत् पूर्वे
षुकामशम्यां भवः पूर्वैषुकामशमः। अपरैषुकामशमः। पूर्वकार्ष्णमृत्तिकः। अपरकार्ष्णमृत्तिकः।
नगराणां पूर्वस्मिन् पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः। अपरपाटलिपुत्रकः। पूर्वकान्यकुब्जः।
अपरकान्यकुब्जः। ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे नगरग्रहणमुभयोरुपादानं तत्संबन्धेन प्र
तिपत्त्यर्थं। द्विकपूर्वपदो हियमुदाहरणः पूर्वैषुकामशम्यास्थिर्यामि नामधेयं। पूर्वपाटलिपुत्रादि
षु पुनः उत्तरपदमेव नगरमाह। तत्र ग्रामवाचिनामङ्गानामवयववात्तद्विकराद्युत्तरस्य वृद्धि
र्भवति तेषाम प्रसंबन्धः। क्रियते इतरत्र द्विशा उत्तरेषां नगराणां मिन्नेव। पूर्वैषुकामशम्या
दिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवतीति ज्ञाप्यते नैतस्य परस्येति प्रतिषेधेन॥ ॥
संख्यायाः संवत्सरसंख्यस्य च॥ १५॥ संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्याशब्दस्य च
चामादेरचो वृद्धिर्भवति। तद्धिते ञिति णिति किति च परतः। द्वौ संवत्सरावधीष्टो भृतो भूतो भावी

वा द्विसांवत्सरिकः। त्रिसांवत्सरिकः। संख्यायाः द्वे षष्टी अधीष्टो भृतो भूतो भावी वा द्विषाष्टिकः। द्वि
साप्ततिकः। द्वे षष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्तमानः कालाधिकारविहितप्रत्ययमु‥दयति
संख्यायाः परिमाणान्तस्येत्येवं सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थं
तेन द्वैसमिकं त्रैसमिकमित्युत्तरपदवृद्धिर्न भवति। द्विवर्षा त्रिवर्षा माणविका इति अपरिमाणवि
स्ताचितकंबल्येभ्यो न तद्धितलुकि इति पर्युदासो न भवति॥ ॥वर्षस्याभविष्यति॥ १६॥ संख्या
या उत्तरस्य वर्षशब्दस्य अचामादेरचो वृद्धिर्भवति। तद्धिते ञिति णिति किति च परतः। सर्वेस्तद्धितो
न विषयः भवति। द्वे वर्षे भृतो भूतो वा द्विवार्षिकः। त्रिवार्षिकः। अभविष्यतीति किं। यस्य त्रैवा
र्षिकं धान्यं पर्याप्तं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति। त्राणि वार्षिकाणि
नावित्रैवार्षिकं। अहन्नतयोरभविष्यतीति प्रतिषेधो न भवति। गम्यते हि तत्र भविष्यत्ता न तु
द्वितीयः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति प्रतिषेधेन भवति॥ ॥परिमाणान्तस्यासं

शाणयोः ॥१७॥ परिमाणांतस्यांगस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति त
द्धिते ञिति णिति किति च परतः। संज्ञायां विषये शाणे चोत्तरपदे न भवति। द्वौ कुडवौ प्रयोजनमस्य
द्विकौडविकः। त्रिकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं। विभाषाकार्षापणसहस्रा
भ्यामित्यत्र सुवर्णशतपरिमाणयोरुपसंख्यानमिति लुको विकल्पः। द्वाभ्यां निष्काभ्यां क्रीतं
द्विनैष्किकं। द्वित्रिभ्यां निष्कादिति लुको विकल्पः। असंज्ञाशाणयोरिति किं। पांचलोहितिकं।
पांचकलापिकं। पंचलोहिन्यः परिमाणमस्य पंचकलापाः परिमाणमस्येति च विगृह्य तदस्य
परिमाणमिति योगविभागेन प्रत्ययः तद्धितांतस्यायं समुदायः संज्ञा॥ शाणाद्वा। द्वित्रिभ्यां च शाणा
वेत्यण्प्रत्ययः। असंज्ञाशाणकुलिजानामिति कर्तव्यं [...] द्वे कुलिजे प्रमाणमस्य द्वैकुलिजि
क इत्येव भवति॥ ॥जे प्रोष्ठपदानां॥१८॥ ज इति ञा[...] द्धि[...]ति ञ्यनुवृत्तं द्धितविशेषणं तस्मि ५
न् ञिति णिति किति च परतः। प्रोष्ठपदानामुत्तरपदस्य [...]देरचो वृद्धिर्भवति। प्रोष्ठपदासु जातः

सिद्धं वेत्याधृत्तुनक्षत्रेभ्योऽणित्यण्प्रत्ययः। प्रौष्ठपदो माणवकः। ज इति किं। यदा प्रोष्ठपदासु मेघो न
स्तनितनिवर्षपति प्रोष्ठपदासु न स इत्यर्थे पूर्वपदवृद्धिरेव प्रोष्ठपदासु भवः प्रौष्ठपदः प्रोष्ठपदाना
मिति बहुवचननिर्देशात्पर्यायोपि गृह्यते। भद्रपदजाति। ॥१९॥ हृद्भगसिंध्वंते पूर्वपदस्य च॥
हृत् भग सिंधु इत्येवमंतेंऽगे पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति। तद्धिते ञिति
णिति किति च परतः। हृत् सुहृद् यस्येदं सौहार्दं। सुहृदयस्य भावः सौहार्द्यं। भग। सुभगस्य भा
वः सौभाग्यं। दौर्भाग्यं। सुभगाया अपत्यं सौभागिनेयः। कल्याण्यादिषु सुभगा दुर्भगेति पठ्यते
सुभगमंत्रे इत्येकं उद्गात्रादिषु पठ्यते। उत्तरपदवृद्धिर्नेष्यते। महते सौभगाय। छंदसि सर्वविधी
नां विकल्पितत्वात्। सिंधु। सक्तुप्रधानाः सिंधवः सक्तुसिंधवः। सक्तुसिंधुषु भवः साक्तुसैंधवः। सिंधु
शब्दः कच्छादिषु पठ्यते। तेन तदंतात्। अधिविधिरिष्यते। त्याण्प्रत्ययः॥ १९ ॥ अनुशतिकादीनां च॥
॥ २० ॥ अनुशतिकादीनां च पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धिर्भवति तद्धिते ञि

का॰ अ॰ ७ पा॰ ३
६४५

तिणिति किति च परतः। अनुशतिकस्येदमानुशातिकं। अनुहोड अनुहोडेन चरति। आनुहौडिकः।
अनुसंवरणेन दीयते। आनुसंवरणिकं। अगारवेणुर्नाम कश्चित्। तस्यापत्यं आगारवैण
वः। असिहत्या तत्र जातं आसिहात्यं। अस्यहत्या केचित्पठंति। ततोपि मुक्कोदत्वादण्प्रत्ययः। अस्य
हत्या शब्दोस्मिन्नध्यायेस्ति। आस्यहात्यः। अस्यदेति केचित्पठंति। अस्यहेति प्रयोजनमस्य
आस्यहैतिकः। अत एव वचनादस्य समुदायस्य प्रातिपदिकत्वं। वितन्केश्वानुकः। वध्योग इति
विदादिरयं तस्यापत्यं वाध्यौगः। पुष्करसत्। अनुहरत्। एतौ बाह्वादिषु पठ्येते। पौष्करसादिः। आनु
हारतिः। कुरुकत गर्गादिः। कौरुकात्यः। कुरुपंचाल। कुरुपंचालेषु भवः। कौरुपांचालः। उन
पदसमुदायो जनपदस्य ग्रहणेन स्यात् तत्तदन्तविज्ञानं भवति। उदकशुद्ध। तस्यापत्यं औदकशौद्धिः।
इहलोक परलोक। तत्र भवः लोकोत्तरपदस्य चेति ठञ्प्रत्ययः। ऐहलौकिकः। पारलौकिकः। स
र्वलोकः सर्वलोके विदितं सार्वलौकिकं। सर्वपुरुष सर्वपुरुषस्येदं सार्वपौरुषं। सर्वभूमि।

सर्वभूमिनिमित्तं संयोगोत्पातो वा सार्वभौमः। प्रयोग तत्र भवः प्रायोगिकः। परस्त्रि पारस्त्रैणेयः
कल्याण्यादीनामिनङ्। कुलटाया वेति इनङ्। राजपुरुषात्ष्यञ्। राजपौरुष्यं। ष्यञीति किं। राजपु
रुषस्यापत्यं राजपुरुषायणिः। उदीचां वृद्धादगोत्रादिति फिञ्। सूत्र नडस्यापत्यं सौत्रनाडिः। आकृ
तिगणश्चायमिष्यते। तेनेदमपि सिद्धं भवति। अभिगम अभिगममर्हति आभिगमिकः। अधिदेव अधिदेवं भवं आ
धिदैविकं। आधिभौतिकं। आचातुर्वैद्यं। ष्यञ्तत्वादयं। चतस्र एव विद्याश्चातुर्वैद्यं। अनुशति
क। अनुहोड। अनुसंवरण। अगारवेणु। अस्यहत्य। असिहत्य। वध्योग। पुष्करसत्। अनुहरत्। कुरु
कत। कुरुपंचाल। उदकशुद्ध। इहलोक। परलोक। सर्वपुरुष। सर्वभूमि। प्रयोग। परस्त्री। राजपुरुषात्ष्य
ञिति। सूत्रनड॥ ॥देवताद्वंद्वे च॥२१॥ देवताद्वंद्वे पूर्वपदस्य चाचामादेरचो वृद्धिर्भवति। ञ
िति णिति किति च परतः। आग्नावारुणीमनड्वाहीमालभेत। आग्निमारुतं कर्म। यो देव
ताद्वंद्वः सकलसंबंधी भवति। स्कंदधायान्तायं विधिः इह तु न भवति। स्कंदविशाखौ देवते अस्य स्कांद

काप्र॰प॰
६४६

विशाखः। ब्रह्मप्रजापती देवते अस्य ब्राह्मप्राजापत्यः॥ ॥नेन्द्रस्य परस्य॥२२॥ दीर्घादुत्तरस्य
वरुणस्य देवताद्वंद्वे। यदुक्तं तन्न भवति। ऐंद्रावरुणं। मैत्रावरुणं। दीर्घादिति किं। आग्निवारुणीं
मनड्वाहीमालभेत। अत्र हि अग्नेः सोमवरुणयोर्नित्यस्य आनङपवादस्य इद्वृद्धावित्यस्य
मपवादो विधीयते। तेन दीर्घात्परो न भवति॥ ॥प्राचां नगरांते॥२३॥ प्राचां देशे नगरशब्दांते
पूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धिर्भवति। तद्धिते ञिति णिति किति वा परतः। सुह्मनगरे भवः सौह्मना
गरः। पौंड्रनागरः। प्राचामिति किं। नदनगरस्योदग्देशे तत्र भवः नादनगरः॥ ॥जंगलधेनुवल
जांतस्य विभाषितमुत्तरं॥२४॥ जंगलधेनुवलज इत्येवमंतस्य अंगस्य पूर्वपदस्याचामादेरचो वृद्धि
र्भवति॥ विभाषितमुत्तरं उत्तरपदस्य विभाषा वृद्धिर्भवति। ञिति णिति किति तद्धिते परतः। कु
रुजंगले भवः। कौरुजंगलः। कौरुजांगलं। धेनुवैश्वधेनवः। वैश्वधैनवः। वलजसौवर्णवलजः। सौ १
वर्णवालजः॥ ॥अर्द्धात्परिमाणस्य पूर्वस्य तु वा॥२५॥ अर्द्धशब्दादुत्तरस्य परिमाणवाचिन।

उत्तरपदस्य वाचामादेरचो वृद्धिर्भवति। पूर्वपदस्य तु वा भवति। तद्धिते ञिति णिति किति वा परतः।
अर्द्धद्रोणेन क्रीतं। आर्द्धद्रौणिकं। आर्द्धकौडविकं। अर्द्धकौडविकं॥ ॥नातः परस्य॥२६॥ अर्द्धा
त्परस्य परिमाणाकारस्य वृद्धिर्न भवति। पूर्वपदस्य तु वा भवति। तद्धिते ञिति णिति किति परतः।
आर्द्धप्रस्थिकं। आर्द्धकंसिकं। अर्द्धकंसिकं। अत इति किं। आर्द्धकौडविकं अर्द्धकौडविकं। तप
रकरणं किं। इह मा भूत्। अर्द्धखार्यां भवः। आर्द्धखारिकः। कोऽत्र विशेषः। सतामसतां वा वृद्धौ स्त्रिया
मस्ति विशेषः। आर्द्धखारी भार्या अस्यासौ आर्द्धखारीभार्यः। किं स्यात् वृद्धिनिमित्तस्यारक्त
विकारे इति पुंवद्भावप्रतिषेधो न स्यात्। यत्र हि तद्धिते वृद्धिः प्रतिषिध्यते स वृद्धिनिमित्तं न भव
तीति तस्मात् पुंवद्भावो न प्रतिषिध्यते। यथा वैयाकरणे भार्या यस्य स वैयाकरणभार्य इति। ॥
प्रवाहणस्य ढे॥२७॥ प्रवाहणशब्दस्य ढे तद्धिते परतः उत्तरपदस्याचामादेरचो वृद्धिर्भवति
पूर्वपदस्य तु वा भवति। प्रवाहणस्यापत्यं प्रावाहणेयः प्रवाहणेयः। शुभ्रादिभ्यो ढक्

काशि॰ पा॰ ३
६४१

पदः ॥ ॥ तत्प्रत्ययस्य च ॥ २९ ॥ तदिति प्रत्ययस्य प्रत्यवमर्शः। प्रत्ययान्तस्य प्रवाहणशब्द-
तद्धिते ञ्णिति णिति किति वा परतः। उत्तरपदस्याचामादेरचो वृद्धिर्भवति। पूर्वपदस्य तु वा भवति।
प्रवाहणेयस्यापत्यं प्रावाहणेयिः प्रवाहणेयिः। प्रवाहणस्येदं प्रावाहणेयकं। वास्य तद्धितनिमि-
त्ता वृद्धिर्गृह्यते न विकल्पेन बाधितुमशक्येति सूत्रारम्भः॥ ॥नञः शुचीश्वरक्षेत्रज्ञकुशलनि-
पुणानां ॥ ३० ॥ नञ उत्तरेषां शुचीश्वरक्षेत्रज्ञकुशलनिपुण इत्येषामचामादेरचो वृद्धिर्भवति
कुशल। अकौशलं आकौशलं निपुण। आनैपुणं अनैपुणं। अत्र केचिदाहुः। इदं पूर्वपदस्य
वृद्धिरप्राप्तैव विषया विधीयते। तथा न नञ्पूर्वात्तत्पुरुषादित्युत्तरो भावः प्रत्ययः प्रतिषिध्यते तत्र
शुच्यादिभ्य एव प्रत्यये कृते पश्चान्नञ्समासे सति वृद्धिर्नञस्यापि वचनाद्भवतीति। तदपरे न मन्यन्ते।
नावचनादन्योपि हि तद्धितो निमित्तमपत्यादिष्वर्थेषु नञ्समासादेव विधीयते कुत्सादेव्यवनञ् ८
समासाद्भाववचनोपि विधीयते तत्राङ्गाधिकारबाधा न युक्तमिति अहेचरं अनाश्वर इत्येतौ

तत्पुरुषावेव ब्राह्मणादिषु पठ्येते। ततस्ताभ्यां भावे स्यात्। ष्यञ् ततः परः। यथातथयथापुरयोः पर्या-
येण॥ ३१॥ नञ इति वर्तते॥ यथातथ यथापुर इत्येतयोर्नञ्उत्तरयोः पूर्वोत्तरपदयोः पर्यायेणाचा-
मादेरचो वृद्धिर्भवति तद्धिते ञ्णिति णिति किति च परतः। अयथातथस्य भावः आयथातथ्यं। अयथा-
तथ्यं। आयथापुर्यं। अयथापौर्यं। अयथातथ अयथापुर इति त्वम् ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ।
यस्त्वत्र यथातथ यथापुर शब्दौ यथासादृश्य इत्यव्ययीभावसमासौ। तथाहि नपुंसकाव्ययपक्षस्तत्र
कृतं। नाव्ये तु यथापदार्थेऽस्ति। अयथातथाभाव इति अयथापुराभाव इति तथा तु सुप्सुपेति समा-
सो द्रष्टव्यः॥ ॥हनस्तोऽचिण्णलोः॥ ३२॥ तद्धितेष्विति निवृत्तं। तत्र कृत्स्विति त्यपि ञ्णिति णिति
च वर्तते। हनस्तकार आदेशो भवति ञिति णिति च प्रत्यये परतः चिण्णलौ वर्जयित्वा। घातयति घा-
तकः। साधुघाती। घातंघातं घातो वर्तते। अचिण्णलोरिति किं। अघानि त्वया नकं जघान वसु-
देवः। धातोः कार्यमुच्यमानं धातुप्रत्यय एव भवति। तेनेह न भवति। वार्त्रघ्नं भौणघ्नं इति॥

आतो युक् चिण्कृतोः॥ आकारांतस्यांगस्य चिणि कृति ञ्णिति युगागमो भवति। अदायि। अधा
यि। कृति। दायः धायः दायकः धायकः॥ चिण्कृतोरिति किं। ददौ दधौ। चोङिः वातौकि वाका
दित्वादिञ्॥ शाहूवैताया अस्यञ्ज्ञः ग्निग्रहणेन क्तद्विशेषणं॥ गोदः। कंबलदः॥ ॥ नोदात्तोपदे
शस्य मांतस्यानाचमेः॥ ३४॥ उदात्तोपदेशस्य मांतस्यांगस्य आचमिवर्जितस्य चिणि कृति ञ्
णिति यदुक्तं तन्न भवति॥ किं चोक्तं अत उपधाया इति वृद्धिः। अशमि। अतमि। अदमि। कृत्यपि
शमकः तमकः दमकः। शमः तमः। शमी तमी दमी। उदात्तोपदेशस्येति किं। यामकः रामकः। क
यमु यमोपरमौ। अनुदात्तोपरमे इति निपातनादनुदात्तौ। उपदेशग्रहणं किं। शमी तमी
दमी। इत्यत्रापि यथा स्यात् इत्युच्यमाने। यामकः रामक इति। मांतस्येति किं। चारकः पाठकः।
अनाचमेरिति किं। आचामकः। अचामि कमि चमि नामि ति वक्तव्यं। वामः कामः आचामः कथ
आम इति। चौरादिकस्य णिचि वृद्धौ सत्यां रूपं। न त्वहि मित्त्वं नास्ति नान्ये मितो हेतौ इति तस्य

विश्राम इमिरित्येवमादिकं प्रयोगमन्याय्यमेवमन्यंते। चिण्कृतोरित्येव। शशाम। ततम॥ ॥
जनिवध्योश्च॥ ३५॥ णेति चिण्कृतोरिति वर्तते। जनि वधि इत्येतयोश्च चिणि कृति ञ्णिति च य
दुक्तं तन्न भवति। अजनि जनकः प्रजनः। अवधि वधकः वधः। वधिः प्रकृत्यंतरं व्यंजनांतोस्ति त
स्यायं प्रतिषेधो विधीयते। न तु कथं वृद्धिर्न विधीयते वधकोपि न हन्यते इति प्रयोगो दृश्यते। हनादे
शस्यादंतत्वादेव वृद्धेरभावः सिद्धः। चिण्कृतोरित्येव। जजान गर्भं महिमानमिंद्रं॥ ॥ अर्त्तिह्री
व्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ॥ ३६॥ सर्वे निवृत्तं। अर्त्ति ह्री व्ली री क्नूयी क्ष्मायी इत्येतेषामं
गानां आकारांतानां च पुगागमो भवति णौ परतः। अर्पि। अर्पयति। ह्रीं ह्रेपयति। व्ली। व्लेपयति।
री। रेपयति। क्नूयी। क्नोपयति। क्ष्मायी। क्ष्मापयति। आकारांतानां। दापयति
धापयंति। अर्त्तीति ऋगति प्रापणयोः। विगताविति द्वयोरपि धात्वोर्ग्रहणं। री इत्यपि री गति
रेषणयोः। री ङ् श्रवण इति। उक्तः प्रत्यांतकरणमदादयादितिउपधाह्रस्वोयथा स्यादिति॥

का॰७॰पा॰३
६४८

शाछासाह्वाव्यावेपांयुक्॥ ३५ ॥ शाछासाह्वाव्यावेपाइत्येतेषांयुगागमोभवतिणौपरतः। शा
निशाययति। छा। अवछाययति। सा। अवसाययति। ह्वा। ह्वाययति। व्याययति। वे। वाययति
पा। पाययति। पाग्रहणे पैः शुषे षोषणे इत्यस्यापि सहणनिर्देशात्। पा रक्षणे इत्यस्य लुक् विकरणत्वान्न भवति। लुगागमस्तस्य वक्ष्यते। पालयति। धूञ्प्रीञोर्नुग्वक्तव्यः। विधूनयति। प्रीणय
ति। एतेपिअवर्णांताएवक्रापंतेनेन अशीशयत्। अपीपयत्। अदूधुनत्। अपिप्रीणत् अपिप
लत्। इत्युपधाह्रस्वत्वंनभवति। शाछासाह्वाव्यावेषांइत्येतेषांकृतात्वानांग्रहणं युक् प्रागिमा
ख्यातुं। किमेतस्याख्याने प्रयोजनं। एतस्मिन्प्रकरणे ग्रहणमतिपदोक्तमस्तेषामनात्वात्
पदश्यति। तेनाध्यापयति। ज्ञापयति। क्रापयति। इत्येवमादिसिद्धं भवति॥ ३६॥ वो विधूननेजुक्
वा। गतिगंधनयोरित्येतस्य विधूननेर्थे वर्तमानस्य जुगागमो भवति णौ परतः। पक्षेणोपवा १०
जयति। विधूनन इति किं। आवापयति केशान्। पैं शोषणे इत्यस्यैतद्रूपं। किमर्थं मत्र

वजगतौ। इतिणपंतसिद्धत्वात्। वातेर्युग्माभूदित्येवमर्थं॥ ३७॥ लीलोर्नुग्लुकावन्यतरस्यां
स्नेहविपातने॥ ली। ला। इत्येतयोरंगयोरन्यतरस्यां यथासंख्यं नुक् लुक् इत्येतावागमौ भवतः णौ परतः स्नेह
विपातनेर्थे। किमिदं स्नेहविपातनं नाम। विपातयते स्नेहः विगलतिकां द्रवत्वं प्रजतीत्यर्थः। तस्य करणं
स्नेहविपातनं। घृतं विलीनयति। घृतं विलालयति। घृतं विलाययति। घृतं विलापयति। लीलीङ्इका
राइति। अत्र गृह्यते। तत इकारांतस्यैवनुग्भवति। नन्विभाषालीयतेरितिकृतात्वस्य। स्नेह
विपातन इति किं। जटाभिरालापयते। लाइति लीलाडेर्ग्रहणं। नाइति लीनौ। कृतात्वस्य वलीयतेर्ग्र
हणं॥ २ ॥ भियोहेतुभयेषुक्॥ ३९॥ भी इत्येतस्यांगस्य हेतुभये षुगागमो भवति णौ परतः। हेतोः
कर्तुर्भयं हेतुभयं। मुंडो भीषयते। जटिलो भीषयते। अत्रापि भी ई इति कारस्य निर्देशः। कृतात्वस्य पुग्
हस्यार्थो द्रष्टव्यः। मुंडो भापयते इति हितं भवति। हेतुभय इति किं। कुंचिकयैनं भाययति। नात्रप्र
योजकाद्धेतुर्भयस्य कारणं। किं तर्हि कुंचिका। स्फायो वः। स्फाय इत्येतस्यांगस्य वकारोनादेशो भवति

का॰अ॰७पा॰३
६५०

णौ परतः। स्फावयति॥ ॥शदेरगतौ तः॥ ४२॥ शदेरगतावर्थे वर्त्तमानस्य तकारादेशो भवति णौ परतः। पुष्पाणि शातयति। फलानि शातयति। अगताविति किं। गाः शादयति गोपालः पशून्॥ ॥रुहः पोन्यतरस्यां॥ ४३॥ रुह इत्येतस्यान्यतरस्यां पकार आदेशो भवति णौ परतः। हस्तान्रोपयति। हस्तान्रोहयति। ब्रीहीन्रोपयति। ब्रीहीन्रोहयति। त्येतस्यान्यतरस्यां॥ ॥प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः॥ ४४॥ प्रत्यये तिष्ठतीति प्रत्ययस्थात्ककारात्पूर्वस्याकारस्य इकार आदेशो भवति आपि परतः। स चेदापसुपः परो न भवति। जटिलिका। मुंडिका। इंतिका। कारिका। हारिका। एतिकाश्चरंति। प्रत्ययग्रहणं किं। शक्नोतीति शक्या। कग्रहणं विस्पष्टार्थं ककारमात्रं हि प्रत्ययो नास्तीति सामर्थ्यात्प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुं कादिति किं। नंदना। रमणा। पूर्वस्येति किं। परस्य मा भूत्। पटुका। मृदुका। अत इति किं। गोका। नौका। तपरकरणं किं। राका। धाका। आपीति किं। कारकः। हारकः। अथापीत्यनेन इतिः किं। विशेष्यते ककारः यद्येवं कारिके। तत्रापि न ॥

न प्राप्नोति। अकारेणाव्यवहितत्वात्। एकादेशेः कृते नास्ति व्यवधानं। एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव। एवं तर्हि वचनाद्व्यवधानमीदृशं यत्र तद्वनीति व्यवहितमेकेन वर्णेन तद्वयापने। रथकट्या। सुनकाम्या। इह तु अष्कातिहेतमनेकेन वर्णेन व्यवधानमिति न भवति। रथकट्या। सुनकाम्या। असुप इति किं। बहवः परिव्राजका अस्यां मथुरायां परिव्राजका मथुरा। सुब्रंताद्य परिव्राजकशब्दात्परस्याविति प्रतिषेधो भवति प्रसज्यप्रतिषेधश्चायं न पर्युदासः। पर्युदासे हि सुपू दयं हुस्वंतात्परश्चाविति इत्वमचस्यादेव। अविद्यमानः सुप् बसि न सोयमसुबित्येवमपि न श्रिय ते। तथा हि सति वहुवचनीकेत्यत्र न स्यात्। मामकनरकयोरुपसंख्यानकर्त्तव्यमप्रत्ययस्थत्वात् ममइयं मामिका। केवलमामकेति नियमात्संज्ञाछंदसोरिति कारोना न्यत्र तेनान्प्रत्ययांतादपि टाब्भवति। नरान्कायतीति नरिका। त्यकन्पश्चोपसंख्यानकर्त्तव्यं उदीचामातः स्थानेयकपूर्वा या इति विकल्पो माभूत्। दाक्षिणात्यिका। इहत्यिका॥ ॥न यासयोः॥ ४५॥ यासाइत्येतयो

का॰अ॰पा॰३
६५१

इकारादेशो न भवति। यका। सका। यासाविति निर्देशो ऽनुतंत्रं। यत्तदोरुपलक्षणमेतत्। इत्वापि प्र
तिषेधषष्ठे। यकां तु कामयध्वं सहे यकांतका पचामहे इति। यासयोरित्वप्रतिषेधे त्यकनेरुपसंख्या
नं। उपत्यका। अधित्यका। पावकादीनां छंदस्युपसंख्यानं कर्त्तव्यं। हिरण्यवर्णाः शुचयः पावकाः
इत्यावाय इष्पमा। लोमकाः। छंदसीति किं। पाविका। अलोमिका। आशिषि वोपसंख्यानं कर्त्तव्यं।
जीवतात् जीवका। नंदतात् नंदका। भवतात् भवका। उत्तरपदलोपे चोपसंख्यानं कर्त्तव्यं। देवद
त्तिका। देवका। यज्ञदत्तिका यज्ञका। क्षिपकादीनां चोपसंख्यानं कर्त्तव्यं। क्षिपका। ध्रुवका। ता
रका। ज्योतिष्युपसंख्यानं कर्त्तव्यं। तारका ज्योतिषीति किं। तारिका दासी। वर्णका तांतवे उप
संख्यानं कर्त्तव्यं। वर्णका। तांतव इति किं। वर्णिका भागुरी लोकायतस्य। वर्त्तका शकुनौ प्रा
चामुपसंख्यानं कर्त्तव्यं। वर्त्तका। शकुनिः। उदीचां तु वर्त्तिका। शकुनाविति किं। वर्त्तिका भागुरी लोका १२
॥ उदीचामातः स्थाने यकपूर्वायाः ॥४४॥ उदीचामाचार्याणां मते आतः स्थाने यकारपूर्वायाः कका

रपूर्वायाश्च यो ऽकारस्तस्य अकारस्य स्थाने इकार आदेशो न भवति। आचार्यग्रहणं विकल्पा
र्थं। इभ्या। इभ्यका। इभ्यिका। क्षत्रियका। क्षत्रियिका। ककारपूर्वायाः चटकका। चटकिका। मूषकका।
मूषिकिका। आत इति किं। सांकाश्ये भवा सांकाशिका। स्थानग्रहणं किं। अनुवादेपि स्थानसंबंध भ
तिपत्त्यर्थं। आत इत्यनेन हि आतःस्थानी विशेष्यते। यकपूर्वाया इति किं। अश्विका। आविका।
स्त्रीलिंगनिर्देशः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थः। इह मा भूत् शुभंयान् तिशुभंयाः। शुभंयिका। भद्रंयिका
धकपूर्वप्रतिषेधे धात्वंतप्रतिषेधः। धात्वंतयोर्यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः।
सुनयिका। सुराधिका। सुपाकिका। सुशोकिका। ॥ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥४५॥
भस्त्रा। एषा। अजा। ज्ञा। द्वा। स्वा। इत्येतेषां नञ्पूर्वाणामनञ्पूर्वाणामपि उदीचामाचार्याणां मते
आतःस्थाने अत इकार आदेशो न भवति। भस्त्रा भस्त्रका। भस्त्रिका। अभस्त्रका। अभस्त्रिका।
एषा। एषका। एषिका। अजा। अजका। अजिका। अनजिका। अनजका। ज्ञा। ज्ञका। ज्ञिका।

अनंतिका। अन्तिका। हाहुक. ईके। स्वकासिका। अस्वका। अस्विका। एषा हि नञ् सर्वेन भय [illegible] तः
[illegible] किंकारणं नञ्हि द्विकचकाभ्यां नञ्समासः। अथापि छलेनञ्समासे पश्चात्कच्।
उ [illegible] पि समा [illegible] न्तयोर्विभक्तिरुत्पद्यते तस्यां सत्यां महायत्वे स [illegible] विं [illegible] सो तदि
स्याविभ [illegible] सुबन्तात् इति संपद्यते तत्रास्तु परत्वान्निप्रतिषेधे इत्व [illegible] किं न
निषिध्यते। [illegible] नेषका अहकेइत्येवनित्यं भवति। [illegible] धातिधना [illegible] सर्वनाम
पुंसोक्तिसन्नत्र वोभिप्रयुज्यति। नत्वेत्यपमनाषितपुंस्क. तस्मान्नाषितपुंस्काद्वेत्येवमिह
यदिग्रहणं तदुपसर्जनार्थं इति यमानान्नस्वापूसा सा अनस्वा। अस्या अनस्वा अनस्त्रका॥
अनस्त्रिका। अत्रोपसर्जनं ह्रस्वत्वे कृते पुनर्वक्तव्य [illegible] षितपुंस्का [illegible] नुपपद्यते। तस्यकोप्यस्ति
ह्रस्वः नासावनाषितपुंस्कात्कातः स्थाने भवति। तस्य [illegible] अथ ग्रहणं उपस [illegible] र्थं नञ्सर्वागाम १३
धात्वपि सहणादन्यप्रवाणां केवलानां वविधिरयमिष्यते। नन [illegible] का [illegible] क्त्रिका वकुनस्त्रका